# PAPER-III
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ____________________________

   (Name) ____________________________

2. (Signature) ____________________________

   (Name) ____________________________

| J | 2 | 5 | 1 | 3 |
|---|---|---|---|---|

OMR Sheet No. : ..............................................

(To be filled by the Candidate)

Roll No. | | | | | | | | |

(In figures as per admission card)

Roll No.____________________________

(In words)

Time : 2 $^1/_2$ hours] [Maximum Marks : **150**

Number of Pages in this Booklet : **8**

Number of Questions in this Booklet : **75**

## Instructions for the Candidates

1. Write your roll number in the space provided on the top of this page.
2. This paper consists of seventy five multiple-choice type of questions.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal / polythene bag on the booklet. Do not accept a booklet without sticker-seal / without polythene bag and do not accept an open booklet.
   (ii) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.**
   (iii) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** (A) (B) ● (D)
   where (C) is the correct response.
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done in the end of this booklet.
8. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return the original OMR Sheet to the invigilators at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry duplicate copy of OMR Sheet on conclusion of examination.
10. **Use only Blue/Black Ball point pen.**
11. **Use of any calculator or log table etc., is prohibited.**
12. **There is no negative marks for incorrect answers.**

## परीक्षार्थियों के लिए निर्देश

1. पहले पृष्ठ के ऊपर नियत स्थान पर अपना रोल नम्बर लिखिए ।
2. इस प्रश्न-पत्र में पचहत्तर बहुविकल्पीय प्रश्न हैं ।
3. परीक्षा प्रारम्भ होने पर, प्रश्न-पुस्तिका आपको दे दी जायेगी । पहले पाँच मिनट आपको प्रश्न-पुस्तिका खोलने तथा उसकी निम्नलिखित जाँच के लिए दिये जायेंगे, जिसकी जाँच आपको अवश्य करनी है :
   (i) प्रश्न-पुस्तिका खोलने के लिए पुस्तिका पर लगी कागज की सील / पोलिथीन बैग को फाड़ लें । खुली हुई या बिना स्टीकर-सील / बिना पोलिथीन बैग की पुस्तिका स्वीकार न करें ।
   (ii) **कवर पृष्ठ पर छपे निर्देशानुसार प्रश्न-पुस्तिका के पृष्ठ तथा प्रश्नों की संख्या को अच्छी तरह चैक कर लें कि ये पूरे हैं । दोषपूर्ण पुस्तिका जिनमें पृष्ठ/प्रश्न कम हों या दुबारा आ गये हों या सीरियल में न हों अर्थात् किसी भी प्रकार की त्रुटिपूर्ण पुस्तिका स्वीकार न करें तथा उसी समय उसे लौटाकर उसके स्थान पर दूसरी सही प्रश्न-पुस्तिका ले लें । इसके लिए आपको पाँच मिनट दिये जायेंगे । उसके बाद न तो आपकी प्रश्न-पुस्तिका वापस ली जायेगी और न ही आपको अतिरिक्त समय दिया जायेगा ।**
   (iii) इस जाँच के बाद OMR पत्रक की क्रम संख्या इस प्रश्न-पुस्तिका पर अंकित कर दें ।
4. प्रत्येक प्रश्न के लिए चार उत्तर विकल्प (A), (B), (C) तथा (D) दिये गये हैं । आपको सही उत्तर के वृत्त को पेन से भरकर काला करना है जैसा कि नीचे दिखाया गया है ।
   **उदाहरण** : (A) (B) ● (D) जबकि (C) सही उत्तर है ।
5. प्रश्नों के उत्तर **केवल प्रश्न पुस्तिका के अन्दर दिये गये OMR पत्रक पर ही** अंकित करने हैं । यदि आप OMR पत्रक पर दिये गये वृत्त के अलावा किसी अन्य स्थान पर उत्तर चिह्नांकित करते हैं, तो उसका मूल्यांकन नहीं होगा ।
6. अन्दर दिये गये निर्देशों को ध्यानपूर्वक पढ़ें ।
7. कच्चा काम (Rough Work) इस पुस्तिका के अन्तिम पृष्ठ पर करें ।
8. यदि आप OMR पत्रक पर नियत स्थान के अलावा अपना नाम, रोल नम्बर, फोन नम्बर या कोई भी ऐसा चिह्न जिससे आपकी पहचान हो सके, अंकित करते हैं अथवा अभद्र भाषा का प्रयोग करते हैं, या कोई अन्य अनुचित साधन का प्रयोग करते हैं, तो परीक्षा के लिये अयोग्य घोषित किये जा सकते हैं ।
9. आपको परीक्षा समाप्त होने पर मूल OMR पत्रक निरीक्षक महोदय को लौटाना आवश्यक है और परीक्षा समाप्ति के बाद उसे अपने साथ परीक्षा भवन से बाहर न लेकर जायें । हालांकि आप परीक्षा समाप्ति पर OMR पत्रक की डुप्लीकेट प्रति अपने साथ ले जा सकते हैं ।
10. **केवल नीले/काले बाल प्वाईंट पेन का ही इस्तेमाल करें ।**
11. **किसी भी प्रकार का संगणक (कैलकुलेटर) या लाग टेबल आदि का प्रयोग वर्जित है ।**
12. **गलत उत्तरों के लिए कोई अंक काटे नहीं जाएँगे ।**

# SANSKRIT
# संस्कृतम्
## Paper – III
## प्रश्नपत्रिका – III

**Note :** This paper contains **seventy five (75)** objective type questions of **two (2)** marks each. **All** questions are compulsory.

**सूचना :** अत्र प्रश्नपत्रे पञ्चसप्तति: **(75)** बहुवैकल्पिका: प्रश्ना: सन्ति । प्रत्येकम् प्रश्नस्य अङ्कद्वयम् वर्तते । **सर्वे** प्रश्ना: समाधेया: ।

**1.** सृष्ट्युत्पत्तिविषयकं विवेचनं वर्तते

(A) पुरुषसूक्ते
(B) अग्निसूक्ते
(C) इन्द्रसूक्ते
(D) पृथिवीसूक्ते

**2.** "ते ह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा:"…. अस्य मन्त्रस्य ऋषिरस्ति

(A) मधुच्छन्दा:
(B) अजीगर्त:
(C) कण्व:
(D) नारायण:

**3.** वाक् सूक्तस्य [ऋग्वेदे 10.125] का देवता ?

(A) वाक्
(B) आत्मा
(C) वेनो भार्गव:
(D) वागाम्भृणी

**4.** "यज्ञस्य देवम्" इत्यत्र "देवम्" पदस्य स्वरोऽस्ति

(A) देव॑म्
(B) देव॒म्
(C) दे॒व॒म्
(D) दे॒वम्

**5.** "अहमस्मि सहमान उत्तरो नाम भूम्याम्" मन्त्रांशोऽयं वर्तते

(A) पृथिवीसूक्ते
(B) वाक्सूक्ते
(C) पुरुषसूक्ते
(D) हिरण्यगर्भसूक्ते

**6.** शुन:शेप - आख्याने उल्लेखो नास्ति

(A) वरुणस्य
(B) वसिष्ठस्य
(C) बादरायणस्य
(D) अजीगर्तस्य

**7.** आध्यात्मिकव्याख्यापद्धतौ वेदे प्रयुक्तस्य अग्नि शब्दस्य अयमर्थ:

(A) श्रौताग्नि:
(B) विद्युत्
(C) परमात्मा
(D) स्मार्ताग्नि:

**8.** अधोऽङ्कितानां समीचीनमुत्तरं चिनुत

| | |
|---|---|
| a. अग्नि: सूर्य आपो विश्वे देवाश्च सं ददु: | 1. शतपथब्राह्मणम् |
| b. सो अङ्ग वेद यदि वा न वेद | 2. अथर्ववेद: |
| c. सा यन्मम त्वं कृतानुकराऽ नु वर्त्मासि | 3. ऐतरेयब्राह्मणम् |
| d. भीम एव सौयवसि: शासेन विशिशासिषु: | 4. ऋग्वेदे |

**कूट :**

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 2 | 4 | 3 | 1 |
| (B) | 2 | 4 | 1 | 3 |
| (C) | 3 | 1 | 4 | 2 |
| (D) | 3 | 1 | 2 | 4 |

**9.** 'तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत:' इत्यस्य कुत्रोपदेश: ?

(A) ईशोपनिषदि
(B) तैत्तिरीयोपनिषदि
(C) श्रीमद्भागवते
(D) बृहदारण्यकोपनिषदि

**10.** 'यन्मनसा न मनुते येनाहुर्मनो मतम्' कुत्रेयमुक्तिः ?

(A) ईशोपनिषदि

(B) केनोपनिषदि

(C) कठोपनिषदि

(D) भगवद्गीतायाम्

**11.** 'अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्धन्ते' – इयमुक्तिः कुत्रास्ति ?

(A) कठोपनिषदि

(B) बृहदारण्यकोपनिषदि

(C) केनोपनिषदि

(D) तैत्तिरीयोपनिषदि

**12.** 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा' – इयमुक्तिः कुत्रास्ति ?

(A) ईशोपनिषदि

(B) तैत्तिरीयोपनिषदि

(C) कठोपनिषदि

(D) केनोपनिषदि

**13.** 'न वा अरे जायायै कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति' – कस्येयमुक्तिः ?

(A) कात्यायन्याः

(B) मैत्रेय्याः

(C) याज्ञवल्क्यस्य

(D) गार्ग्यस्य

**14.** 'वाचं धेनुमुपासीत' – इति कुत्र उपदिश्यते ?

(A) श्रीमद्भागवते

(B) बृहदारण्यकोपनिषदि

(C) तैत्तिरीयोपनिषदि

(D) ईशोपनिषदि

**15.** अधस्तनानां समीचीनमुत्तरं चिनुत

| | |
|---|---|
| a. सामवेदः | 1. कठोपनिषद् |
| b. कृष्णयजुर्वेदः | 2. बृहदारण्य-कोपनिषद् |
| c. शुक्लयजुर्वेदः | 3. तैत्तिरीयोप-निषद् |
| d. एष आदेशः, एष उपदेशः, एषा वेदोपनिषद् | 4. केनोपनिषद् |

**कूट :**

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 4 | 2 | 1 | 3 |
| (C) | 1 | 2 | 3 | 4 |
| (D) | 3 | 2 | 1 | 4 |

**16.** बृहती-छन्दसि कियन्तो वर्णा भवन्ति ?

(A) 44

(B) 40

(C) 36

(D) 38

**17.** चातुर्मास्ययागे वर्तते

(A) अग्निहोत्रम्

(B) आग्रयणम्

(C) सौत्रामणी

(D) साकमेधीयम्

**18.** नारदीयशिक्षा सम्बद्धा वर्तते

(A) सामवेदेन

(B) ऋग्वेदेन

(C) कृष्णयजुर्वेदेन

(D) शुक्लयजुर्वेदेन

**19.** समानाक्षराणि कति ?

(A) 9

(B) 12

(C) 8

(D) 10

**20.** अन्तरिक्षस्थाना देवता अस्ति

(A) अश्विनौ

(B) सोमः

(C) सूर्यः

(D) वायुः

**21.** यास्कीयनिरुक्तानुसारम् अस्य पदत्वेन स्वीकारः नास्ति

(A) नाम्नः ।

(B) उपसर्गस्य ।

(C) आख्यातस्य ।

(D) प्रत्ययस्य ।

**22.** आचिनोत्यर्थान् इति आचार्यपदनिर्वचने कः धातुः ?

(A) चिञ्

(B) आ + चिन्

(C) चिन्

(D) आ + चि

**23.** कस्य किम् मतम् ?

a. अनर्थका: हि मन्त्रा: — 1. नैरुक्तसमय: ।

b. सर्वाणि नामानि आख्यातजानि — 2. वार्ष्यायणि: ।

c. षड्भावविकारा: — 3. कौत्स: ।

d. सर्वाणि नामानि आख्यातजानि न — 4. गार्ग्य: ।

**कूट :**

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 1 | 2 | 4 |
| (B) | 1 | 2 | 4 | 3 |
| (C) | 3 | 2 | 1 | 4 |
| (D) | 4 | 1 | 2 | 3 |

**24.** लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीत्यत्र - लोपागमस्य उदाहरणम् अस्ति

(A) देवा अदुह् ।

(B) उद्ग्राभम् ।

(C) देवा अदुहत ।

(D) देवै दुह्यते ।

**25.** महाभाष्यानुसारम् सिद्धान्तत: व्याकरणशब्दस्य कोऽर्थ: ?

(A) सूत्रम् ।

(B) शब्द: ।

(C) लक्ष्यम् ।

(D) लक्ष्य-लक्षणे ।

**26.** 'भू + शप् > अ + अन्ति' इति स्थिते द्वयो: अकारयो: केन सूत्रेण किम् भवति ?

(A) अतो गुणे । - इत्यनेन पूर्वरूपत्वम् ।

(B) अतो गुणे । - इत्यनेन पररूपत्वम् ।

(C) अतो गुणे । - इत्यनेन गुणादेशत्वम् ।

(D) आद् गुण: । - इत्यनेन गुणादेशत्वम् ।

**27.** धातो: विधीयमान: तव्यत्प्रत्यय: कस्मिन् अर्थे भवति ?

(A) कर्तरि ।

(B) भावे ।

(C) भावे कर्मणि च ।

(D) कर्मणि ।

**28.** द्वेस्तीय: [–पा.सू. 5.2.54] इत्यनेन क: प्रत्यय: विधीयते कश्च तस्य अर्थ: ?

(A) तीय-प्रत्यय:, पूरणे अर्थे ।

(B) तीय-प्रत्यय:, संख्यायाम् अर्थे ।

(C) स्तीय-प्रत्यय:, पूरणे अर्थे ।

(D) द्वेस्तीय-प्रत्यय: मत्वर्थे ।

**29.** 'गोपस्य स्त्री गोपी' – इत्यत्र स्त्रियाम् केन सूत्रेण क: प्रत्ययो भवति ?

(A) ऋन्नेभ्यो ङीप् । - इति ङीप् ।

(B) पुंयोगादाख्यायाम् । - इति ङीष् ।

(C) उगितश्च । - इति ङीष् ।

(D) पत्युर्नो यज्ञसंयोगे । - इति ङीप् ।

**30.** वर्गस्य प्रथमवर्णस्य परिवर्तनम् केवलम् असंयुक्तध्वनिषु एव भवति, न तु संयुक्तध्वनिषु । - इति अपवादनियम: केन प्रदत्त: ?

(A) ग्रीममहोदयेन ।

(B) ग्रासमानमहोदयेन ।

(C) बर्नरमहोदयेन ।

(D) आचार्येण भोलाशङ्करेण ।

**31.** उत्तपते । वितपते । – इत्यनयो: क्रियापदयो: कोऽर्थ: ?

(A) विलापयतीत्यर्थ: ।

(B) संतापयतीत्यर्थ: ।

(C) 'दीप्यते' - इत्यर्थ: ।

(D) उष्णम् करोतीत्यर्थ: ।

**32.** समुद्रगुप्तस्य प्रयागप्रशस्ते: क: रचयिता ?

(A) वासुल: ।

(B) वत्सभट्टि: ।

(C) हरिषेण: ।

(D) वीरसेन: ।

**33.** ब्रह्मसूत्राणां भगवत्पादशङ्कराचार्यस्य व्याख्याया: केन नाम्ना व्यवहार: ?

(A) श्रीभाष्यम्

(B) जय:

(C) शारीरकमीमांसाभाष्यम्

(D) द्वादशलक्षणी

34. 'तत्त्वमसि' इति वाक्यसमन्वये वेदान्ताभिमत लक्षणा वर्तते
(A) जहल्लक्षणा
(B) जहदजहल्लक्षणा
(C) अजहल्लक्षणा
(D) उपादानलक्षणा

35. षड्विधलिङ्गै: समुपेतं किम् ?
(A) श्रवणम्
(B) मननम्
(C) निदिध्यासनम्
(D) अध्यास:

36. सांख्ये अन्त:करणं कतिविधं भवति ?
(A) त्रिविधम्
(B) चतुर्विधम्
(C) षड्विधम्
(D) दशविधम्

37. सांख्याभिमतख्याति: का ?
(A) अनिर्वचनीयख्याति:
(B) अन्यथाख्याति:
(C) विवेकख्याति:
(D) असत्ख्याति:

38. सांख्यानुसारं पुरुषबहुत्वप्रस्थापने कारणं भवति
(A) जननमरणकरणानां प्रतिनियमात्
(B) शरीराकारभेदात्
(C) इन्द्रियसंख्याभेदात्
(D) प्रतिपुरुषं ज्ञानभेदात्

39. अङ्गानां क्रमबोधको विधिर्वर्तते
(A) विनियोगविधि:
(B) नियमविधि:
(C) परिसंख्याविधि:
(D) प्रयोगविधि:

40. अधोनिर्दिष्टेषु कुत्र गुणवादो दृश्यते
(A) अग्निर्हिमस्य भेषजम्
(B) आदित्यो यूप:
(C) इन्द्रो वृत्राय वज्रमुदयच्छत्
(D) बर्हिषि रजतं न देयम्

41. रामायणमाश्रित्य यस्य कथास्ति
(A) कुन्दमाला
(B) रत्नावली
(C) मालविकाग्निमित्रम्
(D) पञ्चरात्रम्

42. यं ग्रन्थमधिकृत्य शङ्कराचार्येण भाष्यं न रचितम्
(A) ब्रह्मसूत्रम्
(B) श्रीमद्भागवतम्
(C) ईशावास्योपनिषद्
(D) श्रीमद्भगवद्गीता

43. जटायुरावणयुद्धं रामायणस्य कस्मिन् काण्डे ?
(A) अरण्यकाण्डे
(B) सुन्दरकाण्डे
(C) किष्किन्धाकाण्डे
(D) बालकाण्डे

44. रामायणे हनुमत: अङ्गुलीयकप्रदानवृत्तान्त: कस्मिन् काण्डे वर्तते ?
(A) सुन्दरकाण्डे
(B) युद्धकाण्डे
(C) किष्किन्धाकाण्डे
(D) उत्तरकाण्डे

45. पुराणपञ्चलक्षणे नास्ति
(A) वंश:
(B) सर्ग:
(C) उत्सर्ग:
(D) प्रतिसर्ग:

46. कस्मिन् पुराणे विविधशास्त्रसम्बन्धिनो विषया: वर्तन्ते ?
(A) मत्स्यपुराणे
(B) शिवपुराणे
(C) विष्णु धर्मोत्तर पुराणे
(D) अग्निपुराणे

47. बालिवधस्य वर्णनमस्ति रामायणस्य
(A) सुन्दरकाण्डे
(B) किष्किन्धाकाण्डे
(C) अरण्यकाण्डे
(D) बालकाण्डे

**48.** अमात्यानां शौचाशौचज्ञानार्थं कौटिल्येन उप धासु या न निर्दिष्टा
(A) कामोपधा
(B) अर्थोपधा
(C) मोक्षोपधा
(D) धर्मोपधा

**49.** 'मन्त्रिपरिषदं द्वादशामात्यान्कुर्वीत' इति कस्य मान्यता ?
(A) बार्हस्पत्यानाम्
(B) कौटिल्यस्य
(C) औशनसाम्
(D) मानवानाम्

**50.** देवानां दिनं भवति
(A) कृष्णपक्ष:
(B) शुक्लपक्ष:
(C) उत्तरायणम्
(D) दक्षिणायनम्

**51.** अङ्गुलिमूले किं तीर्थं भवति ?
(A) ब्राह्मम्
(B) कायम्
(C) दैवम्
(D) पित्र्यम्

**52.** मनुना राजा स्वराष्ट्रे कीदृशोऽभित्रेत: ?
(A) भृशदण्ड:
(B) अजिह्न:
(C) क्षमान्वित:
(D) न्यायवृत्त:

**53.** श्रुतार्थस्योत्तरं कुत्र लेख्यम् ?
(A) नृपसन्निधौ
(B) पूर्वावेदकसन्निधौ
(C) सभासदसन्निधौ
(D) ब्राह्मणसन्निधौ

**54.** अभियोगस्यापह्नवे कियद् धनं राज्ञे दद्यात् ?
(A) द्विगुणम्
(B) त्रिगुणम्
(C) चतुर्गुणम्
(D) अभियोगसमम्

**55.** 'तवाभिधानाद्व्यथते नतानन: स दु:सहान्मन्त्रपदादिवोरग:' – इत्यत्र नतानन: क: ?
(A) सुयोधन:
(B) धर्मराज:
(C) वनेचूर:
(D) भीमसेन:

**56.** रुग्ण: प्रभाकरवर्धन: उपचारहेतो: कुत्र गत: ?
(A) उद्याने
(B) वने
(C) धवलगृहे
(D) स्नानगृहे

**57.** रत्नावलीनाटिकाया: प्रथमाङ्कस्य नाम किम् ?
(A) संकेत:
(B) मदन-महोत्सव:
(C) कदलीगृह:
(D) ऐन्द्रजालिक:

**58.** अधोऽङ्कितानां युग्मानां समीचीनां तालिकां चिनुत

| | |
|---|---|
| a. प्रसिद्धमूर्ध्वज्वलनं हविर्भुज: | 1. किरातार्जुनीयम् |
| b. अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम् | 2. अभिज्ञान-शाकुन्तलम् |
| c. अहो दुरन्ता बलवद्विरोधिता | 3. शिशुपालवधम् |
| d. किमिव हि मधुराणां मण्डनं नाकृतीनाम् | 4. रत्नावली |

**कूट :**

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 2 | 3 | 4 | 1 |
| (B) | 4 | 2 | 1 | 3 |
| (C) | 3 | 4 | 1 | 2 |
| (D) | 1 | 3 | 2 | 4 |

**59.** 'अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति' - इति कस्य लक्षणम् ?
(A) मुखस्य
(B) निर्वहणस्य
(C) बीजस्य
(D) पताकाया:

**60.** "आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानां सद्य: पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।" कोऽत्रालङ्कार: ?
(A) उपमा
(B) दृष्टान्त:
(C) निदर्शना
(D) अर्थान्तरन्यास:

**61.** फलार्थिभि: प्रारब्धस्य कार्यावस्था: कति सन्ति ?
(A) षट्
(B) पञ्च
(C) सप्त
(D) दश

62. ‘न हि खलु सर्व: सर्व जानाति’ - इति कुत्र वर्तते ?
(A) वेणीसंहारे
(B) रत्नावल्याम्
(C) मध्यमव्यायोगे
(D) मुद्राराक्षसे

63. वासवदत्तया कुसुमायुधस्य पूजा कुत्र संपादिता ?
(A) बकुलपादपतले
(B) रक्ताशोकपादपतले
(C) सहकारवृक्षतले
(D) दाडिमवृक्षतले

64. वचो भारवे:
(A) कदलीफलसम्मितम्
(B) द्राक्षाफलसम्मितम्
(C) दाडिमफलसम्मितम्
(D) नारिकेलफलसम्मितम्

65. ‘कारणान्यथ कार्याणि सहकारीणि यानि च’ – कस्य विषये आयाति ?
(A) रसस्वरूपविषये
(B) वस्तुस्वरूपविषये
(C) ध्वनिविषये
(D) अलङ्कार विषये

66. अश्वघोष: कस्य धर्मस्य प्रचारार्थं काव्यानि अलिखत् ?
(A) जैनधर्मस्य
(B) बौद्धधर्मस्य
(C) सिखधर्मस्य
(D) ख्रिष्टधर्मस्य

67. विश्वनाथानुसारं शाब्दी व्यञ्जना कतिधा ?
(A) चतुर्धा
(B) द्विधा
(C) त्रिधा
(D) पञ्चधा

68. ‘वत्से ! सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता’ – कस्येयमुक्ति: ?
(A) दुष्यन्तस्य
(B) गौतम्या:
(C) कण्वस्य
(D) शकुन्तलाया:

69. ‘रसो मुख्यतया अनुकार्ये रामादावेव भवति’ – इति कस्य मतम् ?
(A) भट्टलोल्लटस्य
(B) शङ्कुकस्य
(C) भट्टनायकस्य
(D) अभिनवगुप्तस्य

70. ‘प्रमाकरणं प्रमाणम्’ - इति कस्य लक्षणम् ?
(A) प्रमाया:
(B) प्रत्यक्षस्य
(C) प्रमाणस्य
(D) लक्षणस्य

71. ‘गौरश्व: पुरुषो हस्तीति’ कस्माद् हेतोर्न प्रमाणम् ?
(A) पदत्वात्
(B) सन्निधेरभावात्
(C) परस्पराकाङ्क्षाविरहात्
(D) योग्यताविरहात्

72. ‘पर्वतो वह्निमान् प्रमेयत्वात्’ इत्यत्र दोषो वर्तते
(A) साध्याभाववद्वृत्ति:
(B) दृष्टान्तरहितत्वम्
(C) साध्याभावव्याप्ति:
(D) आश्रयासिद्धित्वम्

73. तर्कसङ्ग्रहदिशा परिमाणं कतिविधम् ?
(A) द्विविधम्
(B) पञ्चविधम्
(C) चतुर्विधम्
(D) षड्विधम्

74. पटं प्रति तुरीवेमादिकं कीदृशं कारणं भवति ?
(A) समवायिकारणम्
(B) असमवायिकारणम्
(C) स्वरूपकारणम्
(D) निमित्तकारणम्

75. ‘पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्’ – अत्र साध्य: क: ?
(A) पृथिवी
(B) गन्धवत्त्वम्
(C) इतरभेद:
(D) गन्धत्वम्

**Space For Rough Work**